वरो दत्तो ज्ञानं वस्य भविष्यति । पुनः प्रोवाच देवेशो निशामयत भो द्विजाः ! । हितं वः कथयाम्यत्र तदनुष्ठीयतां ध्रुवम् । सेव्योत्तरवहा नित्यं लिङ्गमच्चर्यं प्रयत्नतः । दमोदानं दया नित्यं कर्त्तव्यं मुक्तिकाङ्क्षिभिः । इदमेव रहस्यञ्च कथितं, क्षेत्रवासिना । मतिः परहिते कार्य्या वाच्यं नोद्वेगकृद्वचः । मनसाऽपि न कर्त्तव्यमेनोऽत्र विजीगीषुणा । अत्यर्थमक्षयं यस्मात् सुकृतं सुकृतेतरत् । अन्यत्र यत् कृतं पापं तत् काश्यां परिनश्यति । वाराणस्यां कृतं पापमन्तर्गेहे विनश्यति । अन्तर्गेहे कृतं पापं पैशाच्यनरकावहम् । पिशाचनरकप्राप्तिर्गच्छत्येव बहिर्यदि । न कल्पकोटिभिः काश्यां कृतं कर्म प्रभुज्यते । किन्तु रुद्रपिशाचत्वं जायतेऽत्रायुतत्रयम् । वाराणस्यां स्थितो यो वै पातकेष्वारतः सदा । योनिं प्राप्यापि पैशाचीं वर्षाणामयुतत्रयम् । पुनरत्रैव निवसन् ज्ञानं प्राप्स्यत्यनुत्तमम् । तेन ज्ञानेन संप्राप्य मोक्षमाप्स्यत्यनुत्तमम् । दुष्कृतानि विधायेह बहिः पञ्चत्वमागताः । तेषां गतिं प्रवक्ष्यामि शृणुत द्विजसत्तमाः ! । याम्याख्या ये गणाः सन्ति घोरा विकृतमूर्त्तयः । मूषायां ते धमन्त्यादौ क्षेत्रदुष्कृतकारिणः । नयन्त्यनूपप्रायाञ्च ततः प्राचीं दुरासदाम् । वर्षाकाले दुराचारान् पातयन्ति महाजले । जलौकाभिः सपङ्काभिर्दन्दशूकैर्जलोद्भवैः । दुर्निवारैश्च मशकैर्दंश्यन्ते ते दिवानिशम् । ततो याम्यैर्हिमर्त्तौ ते नीयन्तेऽद्रौ हिमालये । अशनावरणैर्हीनाः क्लिश्यन्ते ते दिवानिशम् । मरुस्थले ततो ग्रीष्मे वारिवृक्षविवर्जिते । दिवाकरकरैस्तीव्रैः स्थाप्यन्ते ते पिपासिताः । क्लेशितास्ते गणैरुग्रैर्यातनाभिः समन्ततः । इत्थं कालमसङ्ख्यातमानीयन्ते ततस्त्विह । निवेदयन्ति ते याम्याः कालराजान्तिकं ततः । कालराजोऽपि तान् दृष्ट्वा कर्म्मसंस्मार्य्य दुष्कृतम् । विवस्त्रान् क्षुत्तृषार्त्तांश्च लग्नपृष्ठोदरत्वचः । अन्यै रुद्रपिशाचैश्च सह संयोजयत्यपि । ततो रुद्रपिशाचास्ते भैरवानुचराः सदा । सहन्ते क्लमसत्यर्थं क्षुत्तृड्लग्नत्वसम्भवम् । आहारं रुधिरोन्मिश्रं ते लभन्ते कदाचन । एवं त्र्ययुतसंख्यातं कालं तत्रापि दुःखिताः । श्मशानस्तम्भमभितो नीयन्ते कण्ठपाशिताः । पिपासिता अपि न तेऽम्बुस्पर्शमपि चाप्नुयुः । अथ संक्षीणपापास्ते कालभैरवदर्शनात् । इहैव देहिनो भूत्वा मुच्यन्ते ते ममाज्ञया । तस्मान्न कामयेदत्र वाङ्मनःकर्म्मणाप्यघम् । शुचौ पथि सदा स्थेयं महालाभमपीप्सुभिः । नाविमुक्ते मृतः कश्चिन्नरकं याति किल्बिषी । ममानुग्रहमासाद्य गच्छत्येव परां गतिम् । अनशनं यः कुरुते मद्भक्त इह सुव्रतः । न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि । अशाश्वतमिदं ज्ञात्वा मानुष्यं बहुकिल्बिषम् । अविमुक्तं सदा सेव्यं संसारभयमोचकम् । नान्यत् पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् । सर्वपापप्रशमनीं प्रायश्चित्तं कलौ युगे । जन्मान्तरसहस्रेषु यत्पापं समुपार्जितम् । अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम् । जन्मान्तरसहस्रेषु युञ्जन् योगं यदाप्नुयात् । तदिहैव परो मोक्षो मरणादधिगम्यते । तिर्यग्योनिगताः सत्वा येऽविमुक्ते कृतालयाः । कालेन निधनं प्राप्तास्ते यान्ति परमां गतिम् । अविमुक्तं न सेवन्ते ये मूढास्तमसा हृताः । विण्मूत्ररेतसां मध्ये ते वसन्ति पुनः पुनः । अविमुक्तं समासाद्य यो लिङ्गं स्थापयेत् सुधीः । कल्पकोटिशतैर्वापि नास्ति तस्य पुनर्भवः । ग्रहनक्षत्रताराणां कालेन पतनं ध्रुवम् । अविमुक्तमृतानान्तु पतनं नैव विद्यते । ब्रह्महत्यां नरः कृत्वा पश्चात् संयतमानसः । प्राणांस्त्यजति यः काश्यां स मुक्तो नात्र संशयः । स्त्रियः पतिव्रता याश्च मम भक्तिसमाहिताः । अविमुक्ते मृता विप्रा ! यान्ति ताः परमां गतिम् । अत्रोत्क्रमणकालेऽहं स्वयमेव द्विजोत्तमाः ! । दिशामि तारकं ब्रह्म, देही स्वाद्येन तन्मयः । मन्मना मम भक्तश्च मयि सर्व्वार्पितक्रियः । यथा मोक्षमिहाप्नोति न तथाऽन्यत्र कुत्रचित् । मरणं निश्चितं ज्ञात्वा गतिञ्चासुखदायिनीम् । चलमागन्तुकं सर्वं, ततः काशीं समाश्रयेत् । काशी समाश्रिता यैस्तु मनोवाक्कायकर्मभिः । तानत्र निर्म्मलधियो निर्वाणश्रीः । समाश्रयेत् काशीस्थितैकमपि यः प्रीणयेन्न्यायजैर्धनैः । तेन त्रैलोक्यमखिलं प्रीणितं तु मया सह । यः प्रीणयति पुण्यात्मा निर्वाणनगरीश्वरम् । प्रणयेन स्थितो नित्यं ब्राह्मणाः ! प्रीणयामि तम् । दिवोदासोऽपि राजर्षिः काशीं धर्मेण पालयन् । सदेहो मत्पदं प्राप्तो यतो न पुनरागतिः । अत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना । अतो विमुक्तमासाद्य नान्यद्गच्छेत्तपोवनम् । मोक्षं सुदुर्लभं ज्ञात्वा संसारञ्चातिभीषणम् । अश्मना चरणौ हत्वा कालमत्र प्रतीक्षयेत् । अविमुक्तं परित्यज्य यदा यास्यन्ति दुर्धियः । हसिष्यन्ति तदा भूतान्यन्योन्यकरता-